समर्थ रामदास स्वामी विरचित

# संकटनिरसन मारुतीस्तोत्र
# संस्कृतभावानुवादः

---

भीमरूपो महारुद्रो हनुमान् पवनात्मजः
वनारिरंजनीपुत्रो रामदूतः प्रभंजनः ॥ १
बलेनोत्प्रेरयन् जीवान् प्राणदाता महाबली
सुखकर्ता दुःखहर्ता दूतो वैष्णवगायकः ॥ २
हरिरूपो दीननाथो जगदात्मा सुरूपवान्
पातालदेवताहंता भव्यसिंदूरलेपनः॥ ३
लोकनाथो जगन्नाथः प्राणनाथः पुरातनः
पुण्यवान् पुण्यशीलश्च पावनः परितोषकः ॥ ४
बिभ्रद् ध्वजांगे बाहुभ्यां व्रजत्येव पुरो रुषा
कालाग्निः कालरुद्राग्निः तं दृष्ट्वा वेपते जगत् ॥ ५
दंतवेष्टान् संकुचति ब्रह्मांडेषु न मात्यतः
वमतोऽग्निकणान् नेत्रे भ्रुकुट्यूर्ध्वंगतबला॥ ६
मस्तके कुंचितं पुच्छं श्रवणे कुंडलान्विते
कांचनी मेखला कट्यां किंकिणीघंटिकांचिता ॥ ७
स्थितोऽद्रिरिव सांमुख्ये विभक्तघनगात्रवान्
भीमकायेऽतिचापल्यं महत् विद्युल्लतोपमम् ॥ ८
कोटियोजनमुड्डीय जवादेत्युत्तरां दिशम्
मंदराचलवद् द्रोणो रोषेणोत्पाटितो बलात् ॥ ९
आनीय नीयते पश्चात् यात्यायाति मनोगतिः
मनसोऽपि पुरोगंता नास्ति तुल्या हि तद्गतिः ॥१०
अणुस्वरूपात् ब्रह्मांडमिति यावद् विवर्धते
कुत्र केनोपमा तस्य क्षुद्रो मेरुश्च मंदरः ॥११

ब्रह्मांडं वज्रपुच्छेन शक्तो वेष्टयितुं हरिः
कथं केनोपमा तस्य ब्रह्मांडेऽपि न दृश्यते ॥१२

आरक्तमीक्षितं तेन ग्रासितं रविमंडलम्
नित्यं वर्धिष्णुना तेन भिन्नमाकाशमंडलम्॥१३

धनं धान्यं च पशवो रूपं विद्यादिकं तथा
समग्रं स्तोत्रपाठेन लभते नात्र संशयः ॥१४

भूतप्रेतपिशाचाद्या आधयो व्याधयस्तथा
नश्यन्ति सकलाश्चिंता भीमदर्शनतो मुदा ॥१५

एभिः पंचदशश्लोकैः धरा चंद्रकलागुणैः
वज्रांगी जगती भूत्वा निःसंदेहं विराजते ॥१६

रामदासाग्रणीः श्रीमान् कपिवंशविभूषणः
हनुमान् रामरूपात्मा दर्शनात् दोषदारणः ॥१७

इति संकटनिरसनं श्रीमारुतिस्तोत्रं संपूर्णम् ।

*************

वैद्य श्रीनिवास पु. हिर्लेकर

**(By: Vaidya Shriniwas P. Hirlekar)**